# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा -शास्त्रीद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ६ | गुणाः - ७० |
|---|---|---|
| विषयः - फलितज्यौतिषम् | (C.C.- 2.3.6. New ) | |
| दिनाङ्कः - १०/१२/२०१८ | बृहज्जातकम् । | समयः -०२.०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु द्वयोः सान्वयं व्याख्यां कुरुत ।** **( १० )**

(१) क्रियताम्बुरिजितुमकुलीरलेयपाथोनजूककौर्प्याख्या ।
तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभं चेत्थम् ॥

(२) क्रूरः सौम्यः पुरुषवनिते ते चरागद्विदेहाः
प्रागादीशाः क्रियवृषनृयुक्कर्कटाः सत्रिकोणाः ।
मार्तण्डे-द्वोरयुजि समभे चन्द्रभान्वोश्च-
होरे दृक्काणाः स्युः स्वभवनसुतत्रित्रिकोणाधिपानाम् ॥

(३) शत्रूमन्दसितौ समश्चशशिजो मित्राणिशेषारवे-
स्तीक्ष्णांशुर्हिमरश्मिजश्चसुहृदौ शेषाः समाः शीतगोः ।
जीवेन्दूष्णकराः कुजस्य सुहृदौ ज्ञोऽरिः सिताकर्कोसमौ
मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे ॥

**प्रश्नः २ निम्नलिखितयोः कश्यचिदेकस्योपरि निबन्धं लिखत ।** **( १० )**

(१) ग्रहदृष्टिविचारः । (२) ग्रहमैत्रीविचारः ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेषु कयोश्चिद् द्वयोः सान्वयं व्याख्यां कुरुत ।** **( १० )**

(१) छागे सिंहे वृषे लग्ने तत्स्थे सौरेऽथवाकुजे ।
राश्यंशसदृशे गात्रे जायते नालवेष्टितः ॥

(२) पापावुदपास्तगतौ क्रूरेण युतश्च शशी
दृष्टश्चशुभैर्न यदा मृत्युश्च भवेदाचिरात् ।

(३) दशासु शस्तासु शुभानि कुर्वन्त्यनिष्टसञ्ज्ञास्वशुभानिचैवम् ।
मिश्रासुमिश्राणि दशाफलानि होराफलं लग्नपतेः समानम् ॥

**प्रश्नः ४ अधोलिखितयोः कश्यचिदेकस्योपरि निबन्धं लिखत ।** **( १० )**

(१) अरिष्टविचारः (२) दशाविचारः ।

## तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितेषु कयोश्चिद् द्वयोः सान्वयं व्याख्यां कुरुत ।** **( १० )**

(१) वर्गोत्तमगते लग्ने चन्द्रे वा चन्द्रवर्जितैः
चतुराद्यैर्ग्रहैर्दृष्टे नृपा द्वाविंशतिः स्मृताः ॥

(२) कण्टकादि प्रवृत्तैस्तु चतुर्गृहगतैर्ग्रहैः
यूपेषुशक्तिदण्डाख्या होराद्यैः कण्टकैः क्रमात् ॥

(३) उत्पन्नभोगसुखमुभुग्धनवाहनाढयस्त्या–
गान्वितो दुरुधराप्रभवः सुभृत्यः
केमद्रुमे मलिनदुःखितनीचनिः स्वाः
प्रेष्या खलाश्च नृपतेरपिवंशजाता ॥

**प्रश्नः ६ अधोलिखितयोः कश्यचिदेकस्योपरि निबन्धं लिखत ।** **( १० )**

(१) आजीविकाविचारः ।

(२) नाभसयोगः ।

## चतुर्थान्वितिः

**प्रश्नः ७ निम्नलिखितेषु केषाञ्चितदशप्रश्नानामुत्तरं लिखत ।** **( १० )**

(१) चरराशिनां नामानि लिखत ।

(२) चन्द्रस्य उच्चराशिः का अस्ति ?

(३) 'क्रिय' कस्याः राशेः संज्ञाऽस्ति ?

(४) युग्मराशेः प्रथमभागे कस्य होरा भवति ?

(५) शुक्रस्य मूलत्रिकोणराशिः का ?

(६) पणफरभावाः के ?

(७) भौमस्य रसः कः ?

(८) सूर्यस्य मित्राणां नामानि लिखत ।

(९) उपचयभावानां नामानि लिखत ।

(१०) स्त्रीणां गर्भस्य नवममासस्य स्वामी कः अस्ति ?

(११) अल्पायुर्मानं किमस्ति ?

(१२) नाभसयोगे कति योगाः सन्ति ?

(१३) सूर्यस्य विंशोत्तरीदशावर्षमानं किमस्ति ?

(१४) आत्मकारको ग्रहः कः अस्ति ?

(१५) 'माला' योगस्य लक्षणं लिखत ।

--००--